M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. / Ser. 363

Title: Kaita Veeryaspura Kapacha

363

कार्तवीर्यार्जुन कवच

Title	Kārtaveeryārjuna Kavacha
Author	
Editor	
Year, Vols.	
Publisher	
Remarks	363

श्रीगणेशायनमः श्रीकार्त्तवीर्यार्जुनोजयति· अस्य
श्रीकार्त्तवीर्यार्जुनकवचमंत्रस्य दत्तात्रेयऋषिः अ
नुष्टुप्छंदः श्रीकार्त्तवीर्यार्जुनमहाविष्णुश्चक्रवर्ती देव
ता ममाभिलषितसर्वकार्यार्थसिध्यर्थेजपेविनियो
गः मूलमंत्रेणाष्टादशस्थानानिन्यस्य मूलमंत्रेण
व्यापकांगुलिन्यासौकृत्वा राजन्यश्चक्रवर्त्तिनेहृद
यायनमः वीरायशिरसे० शूरायशिखायै० माहिष्म
तीपतयेकवचाय० रेवांबुलोलपरितृप्तायनेत्रत्रया
य· कारागृहप्रतिबंधितदशास्याय० अस्त्राय० मा
हिष्मत्यांमहात्माकनकमणिगणालंकृतायांसभाया

मासीनोमंत्रिमध्येरविरुचिविलसद्रत्नपीठेनिषण्णः
ध्येयस्त्वैर्बाहुदंडैर्धृतशरनिकरैःपाशचर्मासिशूलैः
प्रासाध्यठ्यैःसर्वसिध्यैसकलदुरितचोरापहृत्यैच
रक्ष्यै ॐश्रीदेव्युवाच देवादिदेवसर्वज्ञसर्वलोक
हितेरत केनरक्षाभवेन्नृणांभीतानांविविधापदि•
राजचोरारिपीडासुग्रहरोगभयेषुच ज्वरापस्मारपी
डासुसिंहव्याघ्रभयेषुच २ राक्षसासुरवेतालपिशाच
प्रेतपातने महाभयेमहानाशेमहानावगतेर्णवे ३ म
हाभृत्युभयेघोरेमहाकलहपातने केनोपायेनसिद्धिः
स्यात्साधकानांमहेश्वर ४ अनष्टद्रव्यरक्षाचनष्ट

का॰ क॰ स्यपुनरागमः सर्वाकर्षणसंक्षोभः सर्वसंहरणंतथा ५
२ भवत्यभीष्टंजन्तूणांकेनतद्वदमेशिव ईश्वरउवाच शृ
णुगुह्यतमंदेविगोपनीयंप्रयत्नतः ६ अवाच्यमपिव
क्ष्यामिसर्वलोकहितायवै कवचंकार्त्तवीर्यस्यसांगावर
णकंक्रमात् ७ स्वमूर्त्तिशक्तिमंत्रौघसजपध्यानपू
र्वकं सहस्रादित्यसंकाशेनानारत्नसमुज्वले ८ भास्व
ध्वजपताकाढ्येतुरंगायुतभूषिते महासंवर्त्तकांभोद
भीमरावविराविणि ९ समुद्धृतमहाछत्रवितानित
वियत्पथे महारथवरे दीप्तेनानायुधविराजिते १० २
सुस्थितंविपुलोदारसहस्रभुजमंडितं वामैरुद्दंडको

दंडान्दधानमपरैःशरान् ११ किरीटहारमुकुटकेयूरव
लयांगुलैः मुद्रिकोदरबंधाढ्यैर्मौंजीनूपुरकादिभिः १२
भूषितंविविधाकल्पैर्भास्वरैःसुमहाधनैः उद्यदादित्यसं
काशकुंडलद्वयशोभितं १३ आबद्धकवचंवीरंसुप्रसन्ना
ननांबुजं धनुर्ज्यासिंहनादेनकंपयंतंजगत्रयं १४ सर्वश
त्रुक्षयकरंसर्वव्याधिविनाशनं सर्वसंपत्प्रदातारंविजय
श्रीनिषेवितं १५ सर्वसौभाग्यदंभद्रंभक्तानांभयनाश
नं दिव्यमालानुलेपाढ्यंसर्वलक्षणसंयुतं १६ रथनाग
श्वपादातिवृंदमध्यस्थमीश्वरं वरदंचक्रवर्त्तीनामाद्यं
लोकैकपालकं १७ समानोदितसाहस्रदिवाकरसमद्यु

का॰ च॰ ३

तिं महायोगबलैश्वर्यकीर्त्याक्रांतजगत्त्रयं १८ श्री
मच्चक्रं हरेरंशादवतीर्णं महाबलं सम्यगात्माविभेदेन
ध्यात्वा रक्षामुदीरयेत् १९ दत्तात्रेय ऋषिः प्रोक्तोनुष्टुप्छं
दः समीरितं कार्त्तवीर्यार्जुनो विष्णुश्चक्रवर्तीश्च देवता २०
विनियोगोस्य रक्षायै सर्वतः परिकीर्तितः सर्वदुष्टविना
शाय सर्वार्थस्य च सिद्धये २१ अस्यांगमूर्त्तयः पंच पांतु
मां स्फटिकोज्वलाः अग्नीशासुरवायव्यकोणेषु हृदया
दिकाः २२ सर्वतोस्त्रज्वलद्रूपा वरचर्मासिपाणयः अव्या
हतबलैश्वर्यशक्तिसामर्थ्यविग्रहाः २३ क्षेमंकरीशक्ति
युक्तश्चोराणां मदभंजनः प्राचीं दिशं रक्षतु मे बाणबाणा
सनायुधः २४ श्रीकरीशक्तिसहितो मारीमदविभंजनः

३

शरचापधरः श्रीमान्दिशं मे वतु दक्षिणां २५ महावश्यक
रीयुक्तोऽशूराणां मदभंजनः महेषुचापधृक्पातु मम प्रा
चेतसीं दिशं २६ यशस्कर्यासमायुक्तो दैत्यानां मदभंज
नः कोदंडेषुधरः सौलीं दिशं मे परिरक्षतु २७ प्रज्ञाकरी
युतश्चापबाणवान्दुष्टनाशनः परिरक्षतु मे सम्यग्विदिशं
चैत्रमानवीं २८ विद्याकरीसमायुक्तः सुमहादुःखनाश
नः पातु मे नैऋतीं चापबाणी विदिशमीश्वरः २९ धनका
र्यासमायुक्तो महादुरितनाशनः इष्वासनेषुधृक्पातु
विदिशं मम वायवीं ३० आयुष्कर्यायुतः श्रीमान्महाभ
यविनाशनः चापेषुधारी शैवीं मे विदिशं परिरक्षतु

का॰ क॰
४

३१ विजयः श्रीयुतः साक्षात्सहस्रारधरो विभुः दिशामूर्ध्वा
मवतु मे महाभयविनाशनः ३२ शंखभृत्सुमहाशक्तिसंयु
क्तो मेधरां दिशं परिरक्षतु मे दुःखध्वांतसंभेदभास्करः ३३
महायोगश्रियायुक्तः सर्वदिक्चक्रमंडलं महायोगेश्वरः
पातु सर्वतो मम पद्मधृक् ३४ एता दिङ्मूर्त्तयो रक्ता रक्त
माल्यांशुकावृताः प्रधानदेवतारूपाः पृथग्रथवरे स्थि
ताः ३५ शक्तयः पद्महस्ताश्च नीलेंदीवरसुप्रभाः सुशु
क्लमाल्यवसनाः सुलिप्ततिलकोज्वलाः ३६ तत्पार्श्वदेव
ता स्वस्ववाहनायुधभूषणाः स्वस्वदिक्षु स्थिताः पांतु
मामिंद्राद्या महाबलाः ३७ एतास्तस्य समाख्याताः स

४

र्वावरणदेवताः सर्वतो मां सदा पांतु सर्वशक्तिसमन्विताः
३८ हृदये चोदरे नाभौ जठरे गुह्यमंडले ऊरुयुग्जानु
पादेषु मूर्ध्नि भ्रूयुगुले पुनः ३९ कर्णाक्षिनासिकावक्त्रकंठ
बाहुयुगेषु च दशबीजात्मका मंत्रा यशःसंपत्तिदायकाः
४० तेजोरूपाः स्थिताः पांतु वांछासुरवरद्रुमाः दशचान्ये
महावर्णा मंत्ररूपा महोज्वलाः ४१ व्यापकत्वेन पात्वस्मा
नापादतलमस्तकं ॐ नमो भगवते भो भो कार्त्तवीर्यार्जुन
ॐ फ्रों सहस्रार ॐ मम हृदये दुःखं दारय २ दुरितं हर हर
पापं मथ मथ आरोग्यं कुरु कुरु द्विषो हन हन हां हां हूं हूं
फट् फट् स्वाहा ॐ नमो भगवते० ॐ त्रीं सहस्रार ॐ

का च ममउदरेदुःखंदारयदारय० हांहांहूंहूंफट्फट्स्वाहा २
५ ॐ नमोभगवते० ॐ क्लींसहस्रार ॐ ममनाभौदुःखंदा
रयदारय० हांहांहूंहूंफट्फट्स्वाहा ३ ॐ नमोभगवते० ॐ
भ्रूंसहस्रार ॐ ममजठरेदुःखंदारयदारय० स्वाहा ४
ॐ नमोभ० ॐ आंसहस्रारममगुह्यमंडलेदुःखंदारय०
स्वाहा ५ ॐ नमोभ० ॐ ह्रींसहस्रारममउरुयुग्जानु
पादेषुदुःखंदा० स्वाहा ६ ॐ नमोभ० ॐ क्रौंसहस्रार
ॐ ममम्रूर्ध्निदुःखं० स्वाहा ७ ॐ नमोभ० ॐ श्रींसहस्रा
र ॐ ममभ्रूयुगलेदुःखंदा० स्वाहा ८ ॐ नमोभ० ॐ
हूंसहस्रार ॐ ममकर्णाक्षिनासिकावक्त्रकंठेदुःखंदार ५

०स्वाहा० ९ ॐ नमोभ० ॐ फट्सहस्रार ॐ ममबाहुयु
गलेदुःखं० स्वाहा १० ॐ नमोभ० ॐ कांसहस्रार ॐ मम
आपादतलमस्तकसर्वशरीरेदुःखं० स्वाहा ११ ॐ नमो
भ० ॐ र्त्तंसहस्रार ॐ आपादतलम० स्वाहा १२ ॐ नमो
भग० ॐ वींसहस्रार ॐ ममआपाद० स्वाहा १३ ॐ नमो० ॐ
र्यांसहस्रार ॐ ममआपादत० स्वाहा १४ ॐ नमो० ॐ
र्जुंसहस्रार ॐ ममआपादत० स्वाहा १५ ॐ नमो० ॐ
नांसहस्रार ॐ ममआपादत० स्वाहा १६ ॐ नमो० ॐ
यंसहस्रार ॐ ममआपादत० स्वाहा १७ ॐ नमोभ०
ॐ मंसहस्रार ॐ ममआपाद० स्वाहा १८ ॐ नमो० ॐ
मःसहस्रार ॐ ममआपादत० स्वाहा १९ ॐ नमोभ

का० ६

गवतेभोभोकार्त्तवीर्यार्जुनॐ क्रोंत्रींक्लींभ्रूंआंह्रींक्रौं
श्रींहुंफट्कार्त्तवीर्यार्जुनायनमःसहस्रारॐ ममआपाद
तलमस्तकंसर्वशरीरेदुःखंदारयदारयदुरितंहरहरपापंम
थमथआरोग्यंकुरुकुरुद्विषोहनहनहांहांहूंहूंफट्फट्
स्वाहा २० कार्त्तवीर्यःशिरःपातुललाटंहैहयेश्वरः सुमु
खोमेमुखंपातुकर्णोव्याप्तजगत्त्रयः ४२ सुकुमारोहनूपा
तुभ्रूयुगंमेधनुर्धरः नयनेपुंडरीकाक्षोनासिकांमेगुणा
करः ४३ ओष्ठौमेसर्वदःपातुब्रह्मगेयोद्विजान्कविः सर्व
शास्त्रकलाधारोजिह्वांचिबुकमव्ययः ४४ दत्तात्रेयप्रियः ६
कंठंस्कंधौराजकुलेश्वरः भुजौदशास्यदर्पघ्नोहृदयंमे

महाबलः ४५ कुक्षौरक्षतुमेविद्वान्वक्षःपरपुरंजयः क
रौसर्वार्थदःपातुकराग्राणिजगत्प्रियः ४६ रेवांबुलीला
संतृप्तोजठरंमेभिरक्षतु महावीरस्तुमेनाभिंपार्श्वंमेस
र्वदुःखहा ४७ सहस्रभुजभृत्पृष्ठंसप्तद्वीपाधिपःकटिं
गुह्यंजितेंद्रियःपातुसक्थिनीयोगिवल्लभः ४८ ऊरू
माहिष्मतीनाथोजानुनीवल्लभोभुवः जंघेवीराधिपःपा
तुपातुपादौमनोजवः ४९ पातुसर्वायुधधरःसर्वांगं
सर्वसंधिषु सर्वदुष्टांतकःपातुधात्वष्टककलेवरं ५०
प्राणादिदशजीवेशान्सर्वशिष्टेष्टदोवतु वशीकृतेंद्रिय
ग्रामःपातुतुसर्वेंद्रियाणिमे ५१ अनुक्तमपियत्स्थानंश

का॰च॰ रीरेंतर्बहिश्चयत् तत्सर्वं पातु मे सर्वलोकनाथेश्वरेश्वरः
७ ५२ वज्रात्सारतरं चेदं शरीरं कवचावृतं बाधाशतविनि
र्मुक्तमस्तु मे भयवर्जितं ५३ बध्वेदं कवचं दिव्यमभेद्यं हैहय
शितुः निचराभिदिवारात्रं निर्भयेनांतरात्मना ५४ राज
मार्गे महादुर्गे मार्गे चोरादिसंकुले विषमे विपिने घोरे द
वाग्नौ गिरिकंदरे ५५ संग्रामे शत्रुसंबाधे सिंहव्याघ्रनिषे
विते गह्वरे सर्पसंकीर्णे संध्याकाले नृपालये ५६ विवादे
विपुलावर्ते समुद्रे च नदीह्रदे परिपंथिसमाकीर्णे देशे द
स्युगणावृते ५७ सर्वस्वहरणे प्राप्ते प्राप्ते प्राणस्य संक
टे नानाज्वरसमावेशे पिशाचप्रेतपातने ५८ मारीदुः ७

स्वप्नपीडासु क्लिष्टे विश्वस्तघातके शरीरे च महादुःखे मा
नसे च महाज्वरे ५९ आधिव्याधिभये विघ्नजालोपद्रवके
पि च न भवेत्तु भयं किंचित्कवचेनावृतस्य मे ६० आगंतु
कामानखिलान्स्मद्वसुविलुंपकान् निवारयतु दोर्दंडस
हस्रेण महारथः ६१ स्वकरोद्धृतसाहस्रपाशबंधान्सुदुर्ज
नान् संरुद्धगतिसामर्थ्यान्करोतु कृतवीर्यजः ६२ सृणि
साहस्रनिर्भिन्नान्सहस्रकरखंडितान् राजचूडामणिः क्षि
प्रं करोत्वस्मद्विरोधकान् ६३ खड्गसाहस्रदलितान्सहस्र
मुसलार्दितान् चोरारिदुष्टसंघौघान्करोतु कमलेक्षणः
६४ स्वशंखनादवित्रस्तान्सहस्रारविदारितान् करोतु

का
८

सर्वदुष्टौघान्सहस्रारसहस्रधृक् ६५ कृतवीर्यसुतोरा
जासहस्रभुजमंडलः अवतारोहरेःसाक्षात्पालयेत्सततं
मम ६६ कार्त्तवीर्यार्जुनोनामराजाबाहुसहस्रवान् तस्य
स्मरणमात्रेणलोकोभवतुनिर्भयः ६७ योभवेल्लोकर
क्षार्थमंशाच्चक्रंहरेर्भुवि तंनमामिमहावीर्यमर्जुनंकृतवी
र्यजं ६८ सहस्रबाहुंसशरंसचापंरक्तांबरंरक्तकिरीटकुंड
लं चोरारिदुष्टभयनाशनमिष्टदंतंवंदेमहाबलविजृंभित
कार्त्तवीर्यं ६९ कार्त्तवीर्यमहावीर्यसर्वदुष्टविनाशन स
र्वत्रसर्वदासर्वदुष्टान्नाशयपाहिमां ७० दक्षेपंचशतंबा
णान्वामेपंचशतंधनुः उत्तिष्ठदुष्टदमनसप्तद्वीपैकपाल

८

क ७१ त्वामेवशरणंप्राप्तंसर्वतोरक्षरक्षमां दुष्टघ्नकिंत्वंस्व
पिषिकिंतिष्ठसिचिरादपि ७२ पाहिनःसर्वदासर्वभये
भ्यःस्वसुतानिव येचोरावसुहर्त्तारोविद्विषोयेचहिंसकाः
७३ अंतरायकराधूर्त्ताश्छद्मकायेदुराशयाः दुर्हृदोदु
ष्टभूपालादुष्टामात्याश्चपापकाः येचकार्यविलोप्तारोये
खलाःपरिपंथिनः सर्वस्वहारिणोयेचयेचमायाविनोपरे
७५ महाक्लेशकराम्लेछादस्यवोवृषलाश्चये येमहाग
रदातारोवंचकाःशस्त्रपाणयः ७६ येपापादुष्टकर्माणोदुः
खदादुष्टबुद्धयः व्याजकाःकुपथासक्तायेचनानाभयप्रदाः
७७ छिद्रान्वेषरतायेचयेस्मान्बाधितुमुद्यताः तेस

का॰ र॰ र्वैकार्त्तवीर्यस्यमहाशंखरवाहताः ७८ सहसाबि
९ लयंयांतुदूरादेवविमोहिताः येदानवामहादैत्यायेयक्षा
येचराक्षसाः ७९ येपिशाचामहासत्वायेभूताब्रह्मराक्षि
साः अपस्मारग्रहायेचयेग्रहाःपिशिताशनाः ८० म
हालोहितभोक्तारोवेतालायेचगुह्यकाः मनोबुद्धींद्रियह
राःस्फोटकाश्चमहाग्रहाः ८१ महाशनाबलिभुजोमहा
कुणपभोजनाः गंधर्वाप्सरसःसिद्धायेचान्येदेवयोनयः
८२ डाकिन्योघोणसाःप्रेताःक्षेत्रपालाविनायकाः
महाव्याघ्रमहामेषमहातुरगरूपगाः ८३ महागजम ९
हासिंहमहामहिषसन्निभाः ऋक्षवाराहशुनकवानरो

लूकमूर्त्तयः ८४ महोष्ट्रखरमार्जारसर्पगोवृषवृश्चिकाः
नानारूपामहासत्वानानाक्लेशसहस्रदाः ८५ नानारोग
कराःक्षुद्रानानावीर्यामहाबलाः वातिकाःपैत्तिकाघो
राश्लेष्मिणसान्निपातिकाः ८६ माहेश्वरावैष्णवाश्चवै
रिंचाश्चमहाग्रहाः स्कांदावैनायकाःक्रूरायेचप्रमथसं
ज्ञकाः ८७ महामातृगणारौद्रामहामारीमसूरिकाः
ऐकाहिकाद्व्याहिकाश्चत्र्याहिकाश्चमहाज्वराः ८८
चातुर्थिकाःपाक्षिकाश्चमासाःषाण्मासिकाश्चये सांवत्स
रादुर्निवार्याज्वराःपरमदारुणाः ८९ स्वाप्निकाश्चमहो
त्पातायेचदुःस्वप्नगाग्रहाः कूश्मांडाभैरवाभौमाराक्ष

का॰ च॰ सानिधिवंचकाः ९० भ्रामकाःप्राणहर्त्तारोयेचबालग्रहा
१० दयः मनोबुद्धींद्रियहराःस्फोटकाश्चमहाग्रहाः ९१ महा
शनाबलिभुजोमहाकुणपभोजनाः दिवाचरारात्रिच
रायेचसंध्यासुदारुणाः ९२ प्रमत्तमप्रमत्तंवायेमांबा
धितुमुद्यताः तेसर्वेकार्त्तवीर्यस्यधनुर्मुक्तशरार्दिताः
९३ सहस्रधाप्रणश्यंतुभग्नसत्वमहोद्यमाः येसर्पा
येमहानागामहागिरिबिलेशयाः ९४ कालव्यालाम
हादंष्ट्रामहाजगरसंज्ञकाः अनंतकुलकाद्याश्चदंष्ट्रा
विषभयानकाः ९५ अनेकशतशीर्षाश्चखंडपुच्छाश्च १०
दारुणाः महाविषजलौकाश्चवृश्चिकारक्तपुच्छकाः ९६

आशीविषाःकालकूटामहाहालाहलाश्चये जलसर्पाज
लव्यालाजलग्राहाश्चकच्छपाः ९७ मत्स्यकाविषपुच्छाश्च
येचान्येजलवासिनः जलजास्थलजाश्चैवनानाभेदशतो
द्भवाः ९८ येचषड्बिंदवोलूताभ्रामराःशुकपुच्छकाः
स्थावराजंगमाश्चैवकृत्रिमाश्चमहाविषाः ९९ गुप्तरू
पागुप्तविषामूषिकागृहगोधिकाः अपस्मारग्रहाघो
रायेमहाविषसंज्ञकाः १०० येस्मान्बाधितुमिच्छंतिशा
रीरेप्राणनाशकाः तेसर्वेकार्त्तवीर्यस्यखड्गसाहस्रखं
डिताः १ दूरादेवविनश्यंतुप्रनष्टेंद्रियसाहसाः मनुष्याः
पशवोवृक्षावानरावनगोचराः २ सिंहव्याघ्रवराहाश्च

महिषायेमहामृगाः गजास्तुरंगागवयारासभाःशरभाद
काः ३ शुनकाद्वीपिनःशुभ्रामार्जाराबिलयोनयः सृगा
लाःशशकाःश्येनागरुत्मंतोविहंगमाः ४ भेरुंडावाय
सागृध्राहंसाद्याःपक्षिजातयः उद्भिज्जाश्चांडजाश्चैवस्वे
दजाश्चजरायुजाः ५ नानाभेदेकुलेजातानानाभेदपृथ
ग्विधाः येस्मान्बाधितुमिछंतिसंध्यासुचदिवानिशि
६ तेसर्वेकार्त्तवीर्यस्यगदासाहस्रचूर्णिताः दूरादेवावि
नश्यंतुलयंयांतुसहस्रधा ७ येचाक्षेपप्रदातारोद्वेष्टारो
येविदूषकाः कृत्यायंत्रप्रकर्त्तारः क्रूरामायाविदश्चये ८
मारणोच्चाटनोन्मूलद्वेषमोहनकारकाः येचाततायि

नोदुष्टायेपापागोप्यकारिणः ९ दाहोपघातगरलशस्त्र
पातादिदुःखदाः क्षेत्रवित्तापहरणाबंधनादिभयप्रदाः
१० विश्वासघातकादुष्टायेचस्वामिद्रुहोनराः ईतयो
विविधाकारायेचान्येदुष्टजातयः ११ पीडाकरायेसतं
छिद्रमीहंतिबाधितुं तेसर्वेकार्त्तवीर्यस्यचक्रसाहस्रचू
र्णिताः १२ दूरादेवविनश्यंतुलयंयांतुसहस्रधा येमे
घायेमहावर्षायेवातायाश्चविद्युतः १३ येमहाजनयो
दीप्तायेनिर्घाताःसुदारुणाः उल्कापाताश्चयेघोरायेमहे
द्रादयःसुराः १४ सूर्येंदुकुजसौम्याश्चगुरुकाव्यशनैश्च
राः राहुश्चकेतवोघोरानक्षत्राणिचराशयः १५ तिथ

कार्त्त.
१२

यः संक्रमामासाहायनायुगनायकाः मन्वंतराधिपाः
सिद्धा ऋषयो योगसिद्धयः १५ निधयो ऋग्यजुःसा
माथर्वणाद्याश्च वह्नयः ऋतवो लोकपालाश्च पितरो देवसं
ततिः १६ विद्याश्चैव चतुःषष्टिभेदार्था भुवनत्रये
एते वै कीर्त्तिताः सर्वे ये चान्येनानुकीर्त्तिताः १७ ते संतु
नः सदा सौम्याः सार्वकालं सुखावहाः आज्ञया कार्त्त
वीर्यस्य योगींद्रस्यामितद्युतेः १८ कार्त्तवीर्यार्जुनो
धन्वी राजेंद्रो हैहयेश्वरः दत्तात्रेयप्रियतमः सहस्रभु
जमंडितः १९ चापी खड्गी रथी बाणी तूणी वर्मी म
हाबलः सुभगः सुमुखः शांतश्चक्रवर्ती गुणाकरः

१२

दशास्यदर्पहारे वा लीलातृप्तः सुदुर्जयः दुःखहा चोर
दमनो राजराजेश्वरः प्रभुः २२ सर्वज्ञः सर्वदः श्रीमान्स
र्वशिष्टेष्टदः कृती राजचूडामणिर्योगी सप्तद्वीपैकनाय
कः २३ विजयी विश्रुतो वाग्मी महामतिरलोलुपः य
ज्वा विप्रप्रियो विद्वान्ब्रह्मगेयः सनातनः माहिष्मतीप
तिर्योद्धा महाकीर्त्तिर्महाभुजः सुकुमारो महावीर्यो मा
रिघ्नो मधुरेक्षणः २५ शत्रुघ्नः शाश्वतः शूरः शंखभृ
द्योगिवल्लभः माहाभागवतो धीमान्महाभयविनाशनः
२६ वीरो विमलवित्ताढ्यो महाबलपराक्रमः विजय
श्रीमयो मान्यो जितारिर्मंत्रनायकः २७ चक्रभृत्कामदः
×असाध्यविग्रहो दिव्यो भावव्याप्तजगत्त्रयः सर्वशास्त्रकलाधारो विरजो×
लोकवंदितः ॥२॥

कांतः कालघ्नः कमलेक्षणः भद्रवादप्रियो वैद्यो विबुधो
वरदो वशी २८ जितेंद्रियो जितारातिः स्वछंदो मितवि
क्रमः शंखभृत्परचक्रघ्नः संग्रामविधिपूजितः २९ म
हाधनो निधिपतिर्महायोगी गुरुप्रियः योगाढ्यः सर्वरोग
घ्नो राजिताखिलभूतलः ३० दिव्यास्त्रविदमेयात्मा स
र्वगोप्ता महोज्वलः सर्वायुधधरो भीष्टप्रदः परपुरंजयः
३१ योगसिद्धो महाकायो महाष्टंदशताधिपः सर्वज्ञा
ननिधिः सिद्धः सिद्धिज्ञानकृतोद्यमः ३२ इत्यष्टशतना
मोत्था मूर्त्तयो दशदिक्पथि सम्यग्दशदिशो व्याप्य
पालयंतु च मां सदा ३३ ~~स्वस्थाः सर्वेंद्रियाः संतु~~ शेषा १३

या मूर्त्तयो ष्टौ च दिक्क्रमेणैव भास्वराः अग्निर्निऋतिवा
य्वीशकोणगाः पांतु मां सदा ३४ स्वस्थाः सर्वेंद्रियाः
संतु शांतिरस्तु सदा मम महासौख्यमसंबाधमारोग्य
मपराजयः ३५ दुःखहानिरविघ्नश्च प्रजासिद्धिः सुखो
दयः वांछासिद्धिरचापल्यमवैषम्यमनामयः ३६ अ
नालस्यमभीष्टं च मृत्युहानिर्बलोन्नतिः भयहानिर्यशः
कांतिर्विद्यावृद्धिर्महोदयः ३७ अनष्टद्रव्यरक्षा च नष्ट
स्य पुनरागमः दीर्घायुष्यं यशोलाभः सौकुमार्यमभी
प्सितं ३८ अप्रधृष्यतमत्वं च महासामर्थ्यमेव च
संतु मे कार्तवीर्यस्य हैहयेंद्रस्य कीर्त्तनात् ३९ य इदं

कार्त्त॰ कार्त्तवीर्यस्यकवचंपुण्यवर्धनं सर्वपापप्रशमनंस
१४ र्वोपद्रवनाशनं ४० सर्वशांतिकरंगुह्यंसमस्तभयनाश
नं विजयार्थप्रदंनृणांसर्वसंपत्प्रदंशिवं ४१ शृणुया
द्वापठेद्वापिसर्वान्कामानवाप्नुयात् मुच्यतेसर्वपापेभ्यः
सर्वत्रविजयीभवेत् ४२ मारीचोरादिपीडाद्यैर्नकदा
चित्प्रबाध्यते पठतःप्रातरुत्थायदुःस्वप्नादिविनश्यति
४३ लभतेवांछितानर्थान्पूज्यतेत्रिदशैरपि शय्या
तलगतोरात्रौयइदंकवचंपठेत् ४४ नतस्यतस्करा
रातिदुःस्वप्नादिकृतंभयं चोरैर्हृदंयदापश्येत्पश्वा १४
दिधनमात्मनः ४५ सप्तवारंतदाजप्त्वानिशिपश्चिम

दिङ्मुखः सप्तरात्रेणलभतेनष्टद्रव्यंनसंशयः ४६ सप्त
विंशतिधाजप्त्वाप्राचीदिङ्वदनोयदि तदादेवासुरनिभं
परचक्रंनिवारयेत् ४७ विवादेकलहेघोरेपंचधायःपठे
दिदं विजयोजायतेतस्यनकदाचित्पराजयः ४८
सम्यक्द्वादशधारात्रौजपेद्बंधविमुक्तये त्रिदिनान्नि
गडग्रस्तोमुच्यतेनात्रसंशयः ४९ अनेनैवविधानेन
सर्वसाधनकर्मसु असाध्यमपिसप्ताहात्साधयेन्मं
त्रवित्तमः ५० यात्राकालेपठित्वैतन्मार्गेगच्छतियोन
रः नदुष्टचोरव्याघ्राद्यैर्भयंस्यात्परिपंथिनः ५१ नित्यं
गृहगतोजप्त्वाकल्याणैरपिपूर्यते नभयंजायते
तस्यदुष्टसत्वादिभिःक्वचित् ५२ सर्वरोगप्रपीडासु

कार्त्त. त्रिधावापंचधापठेत् सरोगमृत्युवेतालभूतप्रेतैर्विमु
१५ च्यते ५३ जपन्नासेचनंकुर्याज्जलेनांजलिनातनौ
न सचासौविषकृत्यादिरोगस्फोटैःप्रबाध्यते ५४ त्रिसं
ध्यासुपठेदेतत्षण्मासंविजितेंद्रियः कालमृत्युमपि
प्राप्तंजपन्नास्त्यत्रसंशयः ५५ पठतःकवचंचेदं विषंना
क्रमतेतनौ नचाप्यंधत्वमूकत्वेनोपसर्गभयंक्वचित्
५६ विंशत्यर्णोक्तविधिनाध्यात्वादेवंतदात्मकं मं
त्रीगुरुप्रसादार्थंमंत्रराजंजपेत्पुनः ५७ कवचेनावृ १५
तोभूयोमंत्रध्यानंसमाचरेत् आदौसंबोधनंकृत्वा
तन्नामध्यानपूर्वकं ५८ चतुरश्चक्रमंत्रार्णानुच्चरे नु
द्बीजपूर्वकान् शरीरन्यासमेवंहियःकरोतिसमाहि

कार्त्त. तः ५९ यथोक्तंलभतेसर्वंफलंवज्रतनुर्भवेत् यथात
१६ थेदंकवचंकस्यचिन्नप्रकाशयेत् ६० गोपनीयंप्रयत्नेन
शिवस्यवचनंयथा सुभक्तायसुशिष्यायदद्यात्सर्वस्व
दायिने ६१ साधकानांहितार्थाययदुक्तंचंद्रमौलिना
कार्त्तवीर्यस्यकवचंयदुक्तंवैमयातव ६२ तेनसंरक्षितो
देविकालेनापिनजीयते तस्मात्सर्वप्रयत्नेनकवचंधा
रयेत्सुधीः ६३ इत्युड्डामलेश्वरतंत्रेउमामहेश्वरसं
वादेकार्त्तवीर्यार्जुनकवचंसंपूर्णम् श्रीचरणार्पणमस्तु
॥ ॥ दुंदुभीवत्सरेमार्गेमासिकृष्णहरेर्दिने कार्त्तवीर्यस्य १६
कवचंबालकृष्णोव्यलीलिखत् १ ॥ श्रीरस्तु ॥ ॥